# Shri Mahaganapati Mantravigraha Kavacham

# श्रीमहागणपति मन्त्रविग्रहकवचम्

## Document Information

Text title : Mahaganapati Mantravigraha Kavacham

File name : mahAgaNapatimantravigrahakavacham.itx

Category : ganesha, kavacha

Location : doc_ganesha

Transliterated by : Krishna Vallapareddy krishna321 at hotmail.com

Proofread by : Krishna Vallapareddy

Description/comments : Vighneshvara Stuti Manjari I, (ed.) S. V. Radhakrishna Sastri

Latest update : June 2, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 2, 2021

*sanskritdocuments.org*

# श्रीमहागणपति मन्त्रविग्रहकवचम्

ॐ अस्य श्रीमहागणपतिमन्त्रविग्रहकवचस्य ।
श्रीशिव ऋषिः । देवीगायत्री छन्दः । श्री महागणपतिर्देवता ।
ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ बीजानि ।
गणपतये वरवरदेति शक्तिः ।
सर्वजनं मे वशमानय स्वाहा कीलकम् ।
श्री महागणपतिप्रसादसिद्ध्यते जपे विनियोगः ।
ॐ श्रीँ ह्रीँ क्लीँ अङ्गुष्ठाभ्यां नमः - हृदयाय नमः ।
ग्लौँ गँ गणपतये तर्जनीभ्यां नमः - शिरसे स्वाहा ।
वरवरद मध्यमाभ्यां नमः - शिखायै वषट् ।
सर्वजनं मे अनामिकाभ्यां नमः - कवचाय हुँ ।
वशमानय कनिष्ठिकाभ्यां नमः - नेत्रत्रयाय वौषट् ।
स्वाहा करतल करपृष्ठाभ्यां नमः - अस्त्राय फट् ।

ध्यानम् -
बीजापूरगदेक्षुकार्मुकरुजा चक्राब्जपाशोत्पल
    व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।
पायाद्वल्लभया सपद्मकरयाश्लिष्टोज्वलद्भूषया
    विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नेश इष्टार्थदः ।
(इति ध्यात्वा । लँ इत्यादि मानसोपचारैः सम्पूजयेत्)
ॐ ओङ्कारो मे शिरः पातु श्रीँकारः पातु भालकम् ।
ह्रीँ बीजं मे ललातेऽव्यात् क्लीँ बीजं भ्रूयुगं मम ॥ १॥

ग्लौँ बीजं नेत्रयोः पातु गँ बीजं पातु नासिकाम् ।
गँ बीजं मुखपद्मेऽव्याद् महासिद्धिफलप्रदम् ॥ २॥

णकारो दन्तयोः पातु पकारो लम्बिकां मम ।
तकारः पातु मे ताल्वोर्यैकार ओष्ठयोर्मम ॥ ३॥

वकारः कण्ठदेशेऽव्याद् रकारश्चोपकण्ठके ।
द्वितीयस्तु वकारो मे हृदयं पातु सर्वदा ॥ ४॥

रकारस्तु द्वितीयो वै उभौ पार्श्वौ सदा मम ।
दकार उदरे पातु सकारो नाभिमण्डले ॥ ५॥

र्वकारः पातु मे लिङ्गं जकारः पातु गुह्यके ।
नकारः पातु मे जङ्घे मेकारो जानुनोर्द्वयोः ॥ ६॥

वकारः पातु मे गुल्फौ शकारः पादयोर्द्वयोः ।
माकारस्तु सदा पातु दक्षपादाङ्गुलीषु च ॥ ७॥

नकारस्तु सदा पातु वामपादाङ्गुलीषु च ।
यकारो मे सदा पातु दक्षपादतले तथा ॥ ८॥

स्वाकारो ब्रह्मरूपाख्यो वामपादतले तथा ।
हाकारः सर्वदा पातु सर्वाङ्गे गणपः प्रभुः ॥ ९॥

पूर्वे मां पातु श्रीरुद्रः श्रीँ ह्रीँ क्लीँ फट् कलाधरः ।
आग्नेय्यां मे सदा पातु ह्रीँ श्रीँ क्लीँ लोकमोहनः ॥ १०॥

दक्षिणे श्रीयमः पातु क्रीँ हँ ऐँ ह्रीँ ह्स्रौँ नमः ।
नैर्ऋत्ये निर्ऋतिः पातु आँ ह्रीँ क्रौँ क्रौँ नमो नमः ॥ ११॥

पश्चिमे वरुणः पातु श्रीँ ह्रीँ क्लीँ फट् ह्स्रौँ नमः ।
वायुर्मे पातु वायव्ये हूँ ह्रीँ श्रीँ ह्स्फ्रैँ नमो नमः ॥ १२॥

उत्तरे धनदः पातु श्रीँ ह्रीँ श्रीँ ह्रीँ धनेश्वरः ।
ईशान्ये पातु मां देवो ह्रौँ ह्रीँ जूँ सः सदाशिवः ॥ १३॥

प्रपन्नपारिजाताय स्वाहा मां पातु ईश्वरः ।
ऊर्ध्वं मे सर्वदा पातु गँ ग्लौँ क्लीँ ह्स्रौँ नमो नमः ॥ १४॥

अनन्ताय नमः स्वाहा अधस्ताद्दिशि रक्षतु ।
पूर्वे मां गणपः पातु दक्षिणे क्षेत्रपालकः ॥ १५॥

पश्चिमे पातु मां दुर्गा ऐँ ह्रीँ क्लीँ चण्डिका शिवा ।
उत्तरे वटुकः पातु ह्रीँ वँ वँ वटुकः शिवः ॥ १६॥

स्वाहा सर्वार्थसिद्धेश्च दायको विश्वनायकः ।
पुनः पूर्वे च मां पातु श्रीमानसितभैरवः ॥ १७॥

आग्नेय्यां पातु नो ह्लीँ ह्लीँ हृँ क्रौँ क्रौँ रुरुभैरवः ।
दक्षिणे पातु मां क्रौँ क्रौँ ह्लैँ ह्लैँ मे चण्डभैरवः ॥ १८॥

नैरृत्ये पातु मां ह्लीँ हूँ ह्लौँ ह्लौँ ह्लीँ ह्स्त्रैँ नमो नमः ।
स्वाहा मे सर्वभूतात्मा पातु मां क्रोधभैरवः ॥ १९॥

पश्चिमे ईश्वरः पातु क्रीँ क्लीँ उन्मत्तभैरवः ।
वायव्ये पातु मां ह्लीँ क्लीँ कपाली कमलेक्षणः ॥ २०॥

उत्तरे पातु मां देवो ह्लीँ ह्लीँ भीषणभैरवः ।
ईशान्ये पातु मां देवः क्लीँ ह्लीँ संहारभैरवः ॥ २१॥

ऊर्ध्वं मे पातु देवेशः श्रीसम्मोहनभैरवः ।
अधस्ताद् वटुकः पातु सर्वतः कालभैरवः ॥ २२॥

इतीदं कवचं दिव्यं ब्रह्मविद्याकलेवरम् ।
गोपनीयं प्रयत्नेन यदीच्छेदात्मनः सुखम् ॥ २३॥

कवचस्य च दिव्यस्य सहस्रावर्तनान्नरः ।
देवतादर्शनं सद्यो लभते न विचारणा ॥ २४॥

इति श्रीमहागणपति मन्त्रविग्रहकवचं सम्पूर्णम् ।

Encoded and proofread by Krishna Vallapareddy krishna321 at hotmail.com

*Shri Mahaganapati Mantravigraha Kavacham*

pdf was typeset on June 2, 2021

Please send corrections to *sanskrit@cheerful.com*